वह्नितेजोभवः श्रीमान् गङ्गाकुक्षिपरिच्युतः ॥
तं कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणाः ।
तदा क्षीरप्रदानार्थं कृत्तिकाः संन्ययोजयन् ॥
ताः क्षीरं तस्य देवस्य समयेन ददुस्तदा ।
स्यादस्माकमयं पुत्त्रः ख्यातो नाम्नेति राघव ! ॥
अन्योन्यं पिबतस्तासां तनयस्य मुखानि षट् ।
समभूवन् महाबाहो ! षण्मुखस्तेन विश्रुतः ॥
ततस्ता देवता ऊचुः कार्त्तिकेय इति प्रभुः ।
पुत्त्रोऽयं जगति ख्यातो भविष्यति न संशयः" ॥

इति वाल्मीकीयरामायणम् ॥*॥ तत्पर्य्यायः महासेनः २ शरजन्मा ३ षडाननः ४ पार्व्वतीनन्दनः ५ स्कन्दः ६ सेनानीः ७ अग्निभूः ८ गुहः ९ बाहुलेयः १० तारकजित् ११ विशाखः १२ शिखिवाहनः १३ षाण्मातुरः १४ शक्तिधरः १५ कुमारः १६ क्रौञ्चदारणः १७ । इत्यमरः ।१।१।४१-४३॥ आग्नेयः १८ दीप्तकीर्त्तिः १९ अनमेयः २० मयूरकेतुः २१ धर्म्मात्मा २२ भूतेशः २३ महिषार्दनः २४ कामजित् २५ कामदः २६ कान्तः २७ सत्यवाक् २८ भुवनेश्वरः २९ शिशुः ३० शीघ्रः ३१ शुचिः ३२ चण्डः ३३ दीप्तवर्णः ३४ शुभाननः ३५ अमोघः ३६ अनघः ३७ रौद्रः ३८ प्रियः ३९ चन्द्राननः ४० दीप्तशक्तिः ४१ प्रशान्तात्मा ४२ भद्रकृत् ४३ कूटमोहनः ४४ षष्ठीप्रियः ४५ पवित्रः ४६ मातृवत्सलः ४७ कन्याहर्त्ता ४८ विभक्तः ४९ स्वाहेयः ५० रेवतीसुतः ५१ प्रभुः ५२ नेता ५३ नैगमेयः ५४ सुदुश्चरः ५५ सुव्रतः ५६ ललितः ५७ बालक्रीडनप्रियः ५८ खचारी ५९ ब्रह्मचारी ६० शूरः ६१ शरवणोद्भवः ६२ विश्वामित्रप्रियः ६३ देवसेनाप्रियः ६४ वासुदेवप्रियः ६५ प्रियकृत् ६६ इति वनपर्व्व ॥ गाङ्गः ६७ स्वामी ६८ द्वादशलोचनः ६९ । इति जटाधरः ॥ सिद्धसेनः ७० शम्भुतनयः ७१ देवसेनापतिः ७२ बालचर्य्यः ७३ कुक्कुवाकुध्वजः ७४ महाबाहुः ७५ युद्धरङ्गः ७६ शिखिध्वजः ७७ । इति शब्दरत्नावली ॥ (पावकात्मजः ७८ । स्कन्दसूनुः ७९ । षट्शिराः ८० । दितिजान्तकः ८१ । इति महाभारतम् ॥ * ॥)

अस्य ध्यानम् । यथा ।

"कार्त्तिकेयं महाभागं मयूरोपरिसंस्थितम् ।
तप्तकाञ्चनवर्णाभं शक्तिहस्तं वरप्रदम् ॥
द्विभुजं शत्रुहन्तारं नानालङ्कारभूषितम् ।
प्रसन्नवदनं देवं सर्व्वसेनासमावृतम्" ॥

इति कार्त्तिकेयपूजापद्धतिः ॥

कार्त्तिकेयप्रसूः, स्त्री, (कार्त्तिकेयं प्रसूते या । प्र + सू + क्विप् । कार्त्तिकेयस्य प्रसूर्व्वा ।) दुर्गा । इति शब्दरत्नावली ॥

कार्त्तिकोत्सवः, पुं, (कार्त्तिक्यां कार्त्तिकीपौर्णमास्यां भव उत्सवः । तत्सम्बन्धी तत्कार्य्यः उत्सवो वा ।) कौमुदी । कार्त्तिकी पूर्णिमा । इति त्रिकाण्डशेषः ॥

कार्पटः, पुं, (कर्पट इव आकारोऽस्यस्य । कर्पट + अच् ।) जतु । जौ इति भाषा । कार्य्यी । इति हेमचन्द्रः ॥ दरबारी उमेदोयार इत्यादि पारस्यभाषा ॥ (कर्पट एव ! स्वार्थे अण् । जीर्णवस्त्रखण्डम् ॥)

कार्पटिकः, पुं, (कार्पटं अन्तस्तत्त्वं वेत्ति इति कर्पटेन चरति इति वा । ठक् । कार्पटोऽस्यस्य वा ठन् ।) मर्म्मवेत्ता । इति त्रिकाण्डशेषः ॥ तीर्थसेवी । इति काशीखण्डम् ॥ ("सायं च तत्रैव वह्निः सकुटुम्बस्तरोस्तले । समावसत् कार्पटिकैः सोऽन्यदेशागतैः सह" ॥ इति कथासरित्सागरे ॥)

कार्पण्यं, क्ली, (कृपणस्य भावः । कृपण + ष्यञ् ।) कृपणता । तत्पर्य्यायः । दैन्यम् २ । इति हेमचन्द्रः ॥ (यथा, भगवद्गीतायाम् २ । ७ ।

"कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्म्मसंमूढचेताः" ॥)

कार्पासः, पुं, क्ली,(कर्पास एव । स्वार्थे अण् ।) कर्पासवृक्षः । कापास् इति भाषा ॥ (अस्य पत्रादिना सर्पदष्टः पुरुषो नीरोगो भवति । इदानीं पत्रादीनां व्यवहारक्रम उच्यते ।

दंशनानन्तरमेव दष्टं पुरुषं सार्द्धद्वितोलकपरिमितः कार्पासपत्ररसः पाययितव्यः । अथ क्षतप्रदेशं विधौतं परिष्कृतञ्च विधाय तत्र पत्ररसः प्रदेयः । क्षतस्योपरि च कार्पासपत्रैः प्रलेपो दातव्यः । एवं कृतेऽपि यदि शरीरस्य कश्चिदंशः स्फीतो भवेत् तदा तत्रैव एतत्पत्ररसेन पेषयितव्यम् । अस्मात् प्रतिसपाददण्डमेवं कृते सर्पदष्टः पुरुषः सुखी भविष्यतीति निश्चयः ॥)

कार्पासं, त्रि, (कर्पास्याः विकारे अवयवे वा अण् विल्वाद्यण् वा ।) कार्पासजातवस्त्रादि । तत्पर्य्यायः । फालम् २ वादरम् ३ । इत्यमरः । २ । ६ । १११ ॥ (यथा, महाभारते २ । ५० । २४ ।

"श्लक्ष्णं वस्त्रमकार्पासमाविकं मृदु चाजिनम्" ॥)

कार्पासधेनुः, स्त्री, (दानार्थं कल्पिता कार्पासवस्त्रनिर्म्मिता धेनुः ।) दानार्थकार्पासादिनिर्म्मितधेनुः । यथा ।

होतोवाच ।

"अथातः संप्रवक्ष्यामि धेनुं कार्पासिकीं नृप ! ।
यत्प्रदानान्नरा यान्ति ऐन्द्रलोकमनुत्तमम् ॥
विषुवे त्वयने पुण्ये युगादिग्रहणे तथा ।
ग्रहपीडासु घोरासु दुःस्वप्नारिष्टदर्शने ॥
पुण्ये ह्यायतने राजन् शुचिदेशे गवां गणे ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य वै तिलान् ॥
तन्मध्ये स्थापयेत् धेनुं वस्त्रमाल्यानुलेपनैः ।
नैवेद्यधूपदीपाद्यैः पूजयेच्च विमत्सरः ॥
उत्तमा चतुर्भिर्भारैस्तदर्द्धेन तु मध्यमा ।
भारेण चाधमा प्रोक्ता वित्तशाठ्यं विवर्जयेत् ॥
चतुर्थांशेन कृत्वा वै वत्सन्तु परिकल्पयेत् ।
कर्त्तव्या स्वर्णशृङ्गी तु रजतक्षुरसंयुता ॥
नानाफलमया दन्ता रत्नगर्भसमन्विता ।
इत्येवं सर्व्वसंपूर्णं कृत्वा श्रद्धासमन्वितः ॥
आवाहयेत्तां कार्पासधेनुं मन्त्रैर्द्विजातये ।
दद्यादथ दर्भपाणिः प्रयतः श्रद्धयान्वितः ॥
पूर्व्वोक्तस्तु विधिः कार्य्यो दानमन्त्रपुरःसरः" ॥

पूर्व्वोक्तविधिः लवणधेनूक्तविधिः ।

"यथा देवगणः सर्व्वस्त्वया हीनो न वर्त्तते ।
तथा मामुद्धरेद्देवि ! पाहि संसारसागरात्" ॥

इत्यादिवराहपुराणे श्वेतोपाख्याने कार्पासधेनुमाहात्म्यम् ॥

कार्पासनासिका, स्त्री, (कार्पासस्य नासिका इव ।) तर्कुः । इति शब्दरत्नावली । टेको इति भाषा ॥

कार्पासिका, स्त्री, (कार्पासी + कन् । ततष्टाप् ।) कार्पासी । इति शब्दरत्नावली ॥ (त्रि, कार्पासाज्जातः । कार्पासनिर्म्मितम् । यथा गोः रामायणे । ५ । ४९ । ५ ।

"अवेष्टयन्त लाङ्गूलं जीर्णैः कार्पासिकैः पटैः" ॥)

कार्पासी, स्त्री, (कार्पास + जातित्वात् ङीष् । यद्वा कर्पासोऽस्त्यस्याः प्रज्ञाद्यण् ततो ङीप् ।) कार्पासवृक्षः । कापास इति भाषा ॥ तत्पर्य्यायः । बदरा २ तुण्डिकेरी ३ समुद्रान्ता ४ । इत्यमरः । २ । ४ । ११६ ॥ पटदः ५ । इति रत्नमाला ॥ सारिणी ६ चव्या ७ तूला ८ गुड़ः ९ तुण्डकेरिका १० मरुद्भवा ११ पिचुः १२ बादरः १३ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । स्तन्यदुग्धकारित्वम् । पित्तकफतृष्णादाहश्रमभ्रान्तिमूर्च्छानाशित्वम् । बलकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पत्रगुणाः । वायुनाशित्वम् । रक्तकारित्वम् । मूत्रवर्द्धकत्वम् । कर्णपिड़िकानादपूयास्रावनाशित्वञ्च । तद्बीजगुणाः । स्तन्यदत्वम् । वृष्यत्वम् । स्निग्धत्वम् । कफकरत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥

कार्म्मः, त्रि, (कर्म्म शीलं अस्य । छत्रादित्वात् णः । "कार्म्मस्ताच्छील्ये" । ६ । ४ । १७२ । इति सूत्रानुसारेण निपातनात् टिलोपः । फलमनपेक्ष्य कर्म्मसु प्रवृत्तः ।) कर्म्मशीलः । इत्यमरः । ३ । १ । १८ ॥

कार्म्मणं, क्ली, (कर्म्मैव इति । कर्म्मन् + "तद्युक्तात् कर्म्मणोऽण्" । ५ । ४ । ३६ । इति अण् । कर्म्मणे हितमिति अण् वा ।) मूलकर्म्म । इत्यमरः । ३ । २ । ४ ॥ ओषध्यादिमूलेन यत् त्रासनोच्चाटनस्तम्भनवशीकरणादिकर्म्म तत् । इति भरतः ॥ (यथा माघे । १० । ३७ ।

"चाटु चाहतकसम्भ्रममासां
कार्म्मणत्वमगमन् रमणेषु" ॥

तथा च, काशीखण्डे ४५ । ९ ।

"काचित्कार्म्मणतत्त्वज्ञा काचित्मौक्तिकगुम्फिका" ॥)

मन्त्रतन्त्रादियोजनम् । (कर्म्म साध्यत्वेन अस्त्यस्य इति अण् ।) कर्म्मठे त्रि । इति मेदिनी ॥

कार्म्मिकः, त्रि, (कर्म्मणा चित्रकर्म्मणा निर्वृत्तः । इति ठक् ।) विचित्रवस्त्रादि । ("कार्म्मिकं कर्म्मणा चित्रेण निर्म्मितं यत्र निष्पन्ने पटे चक्रस्वस्तिकादिकं चित्रसूत्रैः क्रियते तत्कार्म्मिकमित्युच्यते" ॥) इति मिताक्षरा । (तथा च याज्ञवल्क्यः ।२।१८१ । "कार्म्मिके रोमबद्धे च त्रिंशद्भागक्षयो मतः" ॥)

कार्म्मुकं, क्ली, (कर्म्मणे प्रभवतीति । "कर्म्मण